# Natya Shastra Chapter 1

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧

## Document Information

Text title : naaTyashaastra adhyaaya 1

File name : natya01.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : May 24, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ પ્રથમોઽધ્યાયઃ ।
પ્રણમ્ય શિરસા દેવૌ પિતામહમહેશ્વરૌ ।
નાટ્યશાસ્ત્રં પ્રવક્ષ્યામિ બ્રહ્મણા યદુદાહૃતમ્ ॥ ૧॥

સમાપ્તજપ્યં વ્રતિનં સ્વસુતૈઃ પરિવારિતમ્ ।
અનધ્યાયે કદાચિત્તુ ભરતં નાટ્યકોવિદમ્ ॥ ૨॥

મુનયઃ પર્યુપાસ્યૈનમાત્રેયપ્રમુખાઃ પુરા ।
પપ્રચ્છુસ્તે મહાત્માનો નિયતેન્દ્રિયબુદ્ધયઃ ॥ ૩॥

યોઽયં ભગવતા સમ્યગ્ગ્રથિતો વેદસમ્મિતઃ ।
નાટ્યવેદં કથં બ્રહ્મન્નુત્પન્નઃ કસ્ય વા કૃતે ॥ ૪॥

કત્યઙ્ગઃ કિંપ્રમાણશ્ચ પ્રયોગશ્ચાસ્ય કીદૃશઃ ।
સર્વમેતદ્યથાતત્ત્વં ભગવન્વક્તુમર્હસિ ॥ ૫॥

તેષાં તુ વચનં શ્રુત્વા મુનીનાં ભરતો મુનિઃ ।
પ્રત્યુવાચ તતો વાક્યં નાટ્યવેદકથાં પ્રતિ ॥ ૬॥

ભવદ્ભિઃ શુચિભિર્ભૂત્વા તથાઽવહિતમાનસૈઃ ।
શ્રૂયતાં નાટ્યવેદસ્ય સમ્ભવો બ્રહ્મનિર્મિતઃ ॥ ૭॥

પૂર્વં કૃતયુગે વિપ્રા વૃત્તે સ્વાયંભુવેઽન્તરે ।
ત્રેતાયુગેઽથ સમ્પ્રાપ્તે મનોર્વૈવસ્વતસ્ય તુ ॥ ૮॥

ગ્રામ્યધર્મપ્રવૃત્તે તુ કામલોભવશં ગતે ।
ઈર્ષ્યાક્રોધાદિસંમૂઢે લોકે સુખિતદુઃખિતે ॥ ૯॥

દેવદાનવગન્ધર્વયક્ષરક્ષોમહોરગૈઃ ।

જમ્બુદ્વીપે સમાક્રાન્તે લોકપાલપ્રતિષ્ઠિતે ॥ ૧૦॥

મહેન્દ્રપ્રમુખૈર્દેવૈરુક્તઃ કિલ પિતામહઃ ।
ક્રીડનીયકમિચ્છામો દૃષ્યં શ્રવ્યં ચ યદ્ભવેત્ ॥ ૧૧॥

ન વેદવ્યવહારોઽયં સંશ્રાવ્યઃ શૂદ્રજાતિષુ ।
તસ્માત્સૃજાપરં વેદં પઞ્ચમં સાર્વવર્ણિકમ્ ॥ ૧૨॥

એવમસ્ત્વિતિ તાનુક્ત્વા દેવરાજં વિસૃજ્ય ચ ।
સસ્માર ચતુરો વેદાન્યોગમાસ્થાય તત્ત્વવિત્ ॥ ૧૩॥

(નેમે વેદા યતઃ શ્રાવ્યાઃ સ્ત્રીશૂદ્રાદ્યાસુ જાતિષુ ।
વેદમન્યત્તતઃ સ્રક્ષ્યે સર્વશ્રાવ્યં તુ પઞ્ચમમ્ ॥)
ધર્મ્યમર્થ્યં યશસ્યં ચ સોપદેશ્યં સસઙ્ગ્રહમ્ ।
ભવિષ્યતશ્ચ લોકસ્ય સર્વકર્માનુદર્શકમ્ ॥ ૧૪॥

સર્વશાત્રાર્થસમ્પન્નં સર્વશિલ્પપ્રવર્તકમ્ ।
નાટ્યાખ્યં પઞ્ચમં વેદં સેતિહાસં કરોમ્યહમ્ ॥ ૧૫॥

એવં સઙ્કલ્પ્ય ભગવાન્ સર્વવેદાનનુસ્મરન્ ।
નાટ્યવેદં તતશ્ચક્રે ચતુર્વેદાઙ્ગસમ્ભવમ્ ॥ ૧૬॥

જગ્રાહ પાઠ્યમૃગ્વેદાત્સામભ્યો ગીતમેવ ચ ।
યજુર્વેદાદભિનયાન્ રસાનાથર્વણાદપિ ॥ ૧૭॥

વેદોપવેદૈઃ સમ્બદ્ધો નાટ્યવેદો મહાત્મના ।
એવં ભગવતા સૃષ્ટો બ્રહ્મણા સર્વવેદિના ॥ ૧૮॥

ઉત્પાદ્ય નાટ્યવેદં તુ બ્રહ્મોવાચ સુરેશ્વરમ્ ।
ઇતિહાસો મયા સૃષ્ટઃ સ સુરેષુ નિયુજ્યતામ્ ॥ ૧૯॥

કુશલા યે વિદગ્ધાશ્ચ પ્રગલ્ભાશ્ચ જિતશ્રમાઃ ।
તેષ્વયં નાટ્યસંજ્ઞો હિ વેદઃ સંક્રામ્યતાં ત્વયા ॥ ૨૦॥

તચ્છૃત્વા વચનં શક્રો બ્રહ્મણા યદુદાહૃતમ્ ।
પ્રાઞ્જલિઃ  પ્રણતો ભૂત્વા પ્રત્યુવાચ પિતામહમ્ ॥ ૨૧॥

ગ્રહણે ધારણે જ્ઞાને પ્રયોગે ચાસ્ય સત્તમ ।
અશક્તા ભગવન્ દેવા  અયોગ્યા નાટ્યકર્મણિ ॥ ૨૨॥

ય ઇમે વેદગુહ્યજ્ઞા ઋષયઃ સંશિતવ્રતાઃ ।

એતેઽસ્ય ગ્રહણે શક્તાઃ પ્રયોગે ધારણે તથા ॥ ૨૩॥

શ્રુત્વા તુ  શક્રવચનં મામાહામ્બુજસમ્ભવઃ ।
ત્વં પુત્રશતસંયુક્તઃ પ્રયોક્તાઽસ્ય ભવાનઘ ॥ ૨૪॥

આજ્ઞાપિતો વિદિત્વાઽહં નાટ્યવેદં પિતામહાત્ ।
પુત્રાનધ્યાપયામાસ પ્રયોગં ચાપિ તત્ત્વતઃ ॥ ૨૫॥

શાણ્ડિલ્યં ચૈવ વાત્સ્યં ચ કોહલં દત્તિલં તથા ।
જટિલમ્બષ્ટકૌ ચૈવ તણ્ડુમગ્નિશિખં તથા ॥ ૨૬॥

સૈન્ધવં  સપુલોમાનં શાડ્વલિં વિપુલં તથા ।
કપિઞ્જલિં વાદિરં ચ યમધૂમ્રાયણૌ તથા ॥ ૨૭॥

જમ્બુધ્વજં કાકજઙ્ઘં સ્વર્ણકં તાપસં તથા ।
કૈદારિં શાલિકર્ણં ચ દીર્ઘગાત્રં ચ શાલિકમ્ ॥ ૨૮॥

કૌત્સં તાણ્ડાયનિં ચૈવ પિઙ્ગલં ચિત્રકં તથા ।
બન્ધુલં ભલ્લકં ચૈવ મુષ્ઠિકં સૈન્ધવાયનમ્ ॥ ૨૯॥

તૈતિલં ભાર્ગવં ચૈવ શુચિં બહુલમેવ ચ ।
અબુધં બુધસેનં ચ પાણ્ડુકર્ણં સુકેરલમ્ ॥ ૩૦॥

ઋજુકં મણ્ડકં ચૈવ શમ્બરં વઞ્જુલં તથા ।
માગધં સરલં ચૈવ કર્તારં ચોગ્રમેવ ચ ॥ ૩૧॥

તુષારં પાર્ષદં ચૈવ ગૌતમં બાદરાયણમ્ ।
વિશાલં શબલં ચૈવ સુનામં મેષમેવ ચ ॥ ૩૨॥

કાલિયં ભ્રમરં ચૈવ તથા પીઠમુખં મુનિમ્ ।
નખકુટ્ટાશ્મકુટ્ટૌ ચ ષટ્પદં સોત્તમં તથા ॥ ૩૩॥

પાદુકોપાનહૌ ચૈવ શ્રુતિં ચાષસ્વરં તથા ।
અગ્નિકુણ્ડાજ્યકુણ્ડૌ ચ વિતણ્ડ્યં તાણ્ડ્યમેવ ચ ॥ ૩૪॥

કર્તરાક્ષં હિરણ્યાક્ષં કુશલં દુસ્સહં તથા ।
લાજં ભયાનકં ચૈવ બીભત્સં સવિચક્ષણમ્ ॥ ૩૫॥

પુણ્ડ્રાક્ષં પુણ્ડ્રનાસં ચાપ્યસિતં સિતમેવ ચ ।
વિદ્યુજ્જિહ્વં મહાજિહ્વં શાલઙ્કાયનમેવ ચ ॥ ૩૬॥

શ્યામાયનં માઠરં ચ લોહિતાઙ્ગં તથૈવ ચ ।
સંવર્તકં પઞ્ચશિખં ત્રિશિખં શિખમેવ ચ ॥ ૩૭॥

શઙ્ખવર્ણમુખં શણ્ડં શઙ્કુકર્ણમથાપિ ચ ।
શક્રનેમિં ગભસ્તિં ચાપ્યંશુમાલિં શઠં તથા ॥ ૩૮॥

વિદ્યુતં શાતજઙ્ઘં ચ રૌદ્રં વીરમથાપિ ચ ।
પિતામહાજ્ઞયાઽસ્માભિર્લોકસ્ય ચ ગુણેપ્સયા ॥ ૩૯॥

પ્રયોજિતં પુત્રશતં યથાભૂમિવિભાગશઃ ।
યો યસ્મિન્કર્મણિ યથા યોગ્યસ્તસ્મિન્ સ યોજિતઃ ॥ ૪૦॥

ભારતીં સાત્વતીં ચૈવ વૃત્તિમારભટીં તથા ।
સમાશ્રિતઃ પ્રયોગસ્તુ પ્રયુક્તો વૈ મયા દ્વિજાઃ ॥ ૪૧॥

પરિગૃહ્ય પ્રણમ્યાથ બ્રહ્મા વિજ્ઞાપિતો મયા ।
અથાહ માં સુરગુરુઃ કૈશિકિમપિ યોજય ॥ ૪૨॥

યચ્ચ તસ્યાઃ ક્ષમં દ્રવ્યં તદ્ બ્રૂહિ દ્વિજસત્તમ ।
એવં તેનાસ્મ્યભિહિતઃ પ્રત્યુક્તશ્ચ મયા પ્રભુઃ ॥ ૪૩॥

દીયતાં ભગવન્દ્રવ્યં કૈશિક્યાઃ સમ્પ્રયોજકમ્ ।
નૃત્તાઙ્ગહારસમ્પન્ના  રસભાવક્રિયાત્મિકા ॥ ૪૪॥

દૃષ્ટા મયા ભગવતો નીલકણ્ઠસ્ય નૃત્યતઃ ।
કૈશિકી ષ્લક્ષ્ણનૈપથ્યા શ઼ૃઙ્ગારરસસમ્ભવા ॥ ૪૫॥

અશક્યા પુરુષૈઃ સા તુ પ્રયોક્તું સ્ત્રીજનાદૃતે ।
તતોઽસૃજન્મહાતેજા મનસાઽપ્સરસો વિભુઃ ॥ ૪૬॥

નાટ્યાલઙ્કારચતુરાઃ પ્રાદાન્મહ્યં પ્રયોગતઃ ।
મઞ્જુકેશીં સુકેશીં ચ મિશ્રકેશીં સુલોચનામ્ ॥ ૪૭॥

સૌદામિનીં દેવદત્તાં દેવસેનાં મનોરમામ્ ।
સુદતીં સુન્દરીં ચૈવ વિદગ્ધાં વિપુલાં તથા ॥ ૪૮॥

સુમાલાં સન્તતિં ચૈવ સુનન્દાં સુમુખીં તથા ।
માગધીમર્જુનીં ચૈવ સરલાં કેરલાં ધૃતિમ્ ॥ ૪૯॥

નન્દાં સપુષ્કલાં ચૈવ કલમાં ચૈવ મે દદૌ ।
સ્વાતિર્ભાણ્ડનિયુક્તસ્તુ સહ શિષ્યૈઃ સ્વયમ્ભુવા ॥ ૫૦॥

નારદાદ્યાશ્ચ ગન્ધર્વા ગાનયોગે નિયોજિતાઃ ।
એવં નાટ્યમિદં સમ્યગ્બુદ્ધ્વા સર્વૈઃ સુતૈઃ સહ ॥ ૫૧॥

સ્વાતિનારદસંયુક્તો વેદવેદાઙ્ગકારણમ્ ।
ઉપસ્થિતોઽહં બ્રહ્માણં પ્રયોગાર્થં કૃતાઞ્જલિઃ ॥ ૫૨॥

નાટ્યસ્ય ગ્રહણં પ્રાપ્તં બ્રૂહિ કિં કરવાણ્યહમ્ ।
એતત્તુ વચનં શ્રુત્વા પ્રત્યુવાચ પિતામહઃ ॥ ૫૩॥

મહાનયં પ્રયોગસ્ય સમયઃ પ્રત્યુપસ્થિતઃ ।
અયં ધ્વજમહઃ શ્રીમાન્ મહેન્દ્રસ્ય પ્રવર્તતે ॥ ૫૪॥

અત્રેદાનીમયં વેદો નાટ્યસંજ્ઞઃ પ્રયુજ્યતામ્ ।
તતસ્તસ્મિન્ધ્વજમહે નિહતાસુરદાનવે ॥ ૫૫॥

પ્રહૃષ્ટામરસંકીર્ણે મહેન્દ્રવિજયોત્સવે ।
પૂર્વં કૃતા મયા નાન્દી હ્યાશીર્વચસંયુતા ॥ ૫૬॥

અષ્ટાઙ્ગપદસંયુક્તા વિચિત્રા વેદનિર્મિતા ।
તદન્તેઽનુકૃતિર્બદ્ધા યથા દૈત્યાઃ સુરૈર્જિતાઃ ॥ ૫૭॥

સમ્ફેટવિદ્રવકૃતા ચ્છેદ્યભેદ્યાહવાત્મિકા ।
તતો બ્રહ્માદયો દેવાઃ પ્રયોગપરિતોષિતાઃ ॥ ૫૮॥

પ્રદદુર્મત્સુતેભ્યસ્તુ સર્વોપકરણાનિ વૈ ।
પ્રીતસ્તુ પ્રથમં શક્રો દત્તવાન્સ્વં ધ્વજં શુભમ્ ॥ ૫૯॥

બ્રહ્મા કુટિલકં ચૈવ ભૃઙ્ગારં વરુણઃ શુભમ્ ।
સૂર્યશ્છત્રં શિવસ્સિદ્ધિં વાયુર્વ્યજનમેવ ચ ॥ ૬૦॥

વિષ્ણુઃ સિંહાસનં  ચૈવ કુબેરો મુકુટં તથા ।
શ્રાવ્યત્વં પ્રેક્ષણીયસ્ય દદૌ દેવી સરસ્વતી ॥ ૬૧॥

શેષા યે દેવગન્ધર્વા યક્ષરાક્ષસપન્નગાઃ ।
તસ્મિન્સદસ્યભિપ્રેતાન્નાનાજાતિગુણાશ્રયાન્ ॥ ૬૨॥

અંશાંશૈર્ભાષિતં ભાવાન્ રસાન્ રૂપં બલં તથા ।
દત્તવન્તઃ પ્રહૃષ્ટાસ્તે મત્સુતેભ્યો દિવૌકસઃ ॥ ૬૩॥

એવં પ્રયોગે પ્રારબ્ધે દૈત્યદાનવનાશને ।

અભવન્ક્ષુભિતાઃ સર્વે દૈત્યા યે તત્ર સઙ્ગતાઃ ॥ ૬૪॥

વિરૂપાક્ષ પુરોગાંશ્ચ વિઘ્નાન્પ્રોત્સાહ્ય તેઽબ્રુવન્ ।
ન ક્ષમિષ્યામહે નાટ્યમેતદાગમ્યતામિતિ ॥ ૬૫॥

તતસ્તૈરસુરૈઃ સાર્ધં વિઘ્ના માયામુપાશ્રિતાઃ ।
વાચશ્ચેષ્ટાં સ્મૃતિં ચૈવ સ્તમ્ભયન્તિ સ્મ નૃત્યતામ્ ॥ ૬૬॥

તથા વિધ્વંસનં દૃષ્ટ્વા સૂત્રધારસ્ય દેવરાટ્ ।
કસ્માત્પ્રયોગવૈષમ્યમિત્યુક્ત્વા ધ્યાનમાવિશત્ ॥ ૬૭॥

અથાપશ્યત્સદો વિઘ્નૈઃ સમન્તાદ્પરિવારિતમ્ ।
સહેતરૈઃ સૂત્રધારં નષ્ટસંજ્ઞં જડીકૃતમ્ ॥ ૬૮॥

ઉત્થાય ત્વરિતં શક્રં ગૃહીત્વા ધ્વજમુત્તમમ્ ॥

સર્વરત્નોજ્જ્વલતનુઃ કિઞ્ચિદુદ્વૃત લોચનઃ ॥ ૬૯॥

રઙ્ગપીઠગતાન્વિઘ્નાનસુરાંશ્ચૈવ દેવરાટ્ ।
જર્જરીકૃતદેહાંસ્તાનકરોજ્જર્જરેણ સઃ ॥ ૭૦॥

નિહતેષુ ચ સર્વેષુઅ વિઘ્નેષુ સહ દાનવૈઃ ।
સંપ્રહૃષ્ય તતો વાક્યમાહુઃ સર્વે દિવૌકસઃ ॥ ૭૧॥

અહો પ્રહરણં દિવ્યમિદમાસાદિતં ત્વયા ।
જર્જરીકૃતસર્વાઙ્ગા યેનૈતે દાનવાઃ કૃતાઃ ॥ ૭૨॥

યસ્માદનેન તે વિઘ્નાઃ સાસુરા જર્જરીકૃતાઃ ।
તસ્માજ્જર્જર એવેતિ નામતોઽયં ભવિષ્યતિ ॥ ૭૩॥

શેષા યે ચૈવ હિંસાર્થમુપયાસ્યન્તિ હિંસકાઃ ।
દૃષ્ટ્વૈવ જર્જરં તેઽપિ ગમિષ્યન્ત્યેવમેવ તુ ॥ ૭૪॥

એવમેવાસ્ત્વિવતિ તતઃ શક્રઃ પ્રોવાચ તાન્સુરાન્ ।
રક્ષાભૂતશ્ચ સર્વેષાં ભવિષ્યત્યેષ જર્જરઃ ॥ ૭૫॥

પ્રયોગે પ્રસ્તુતે હ્યેવં સ્ફીતે શક્રમહે પુનઃ ।
ત્રાસં સઞ્જનયન્તિ સ્મ વિઘ્નાઃ શેષાસ્તુ નૃત્યતામ્ ॥ ૭૬॥

દૃષ્ટ્વા તેષાં વ્યવસિતં દૈત્યાનાં વિપ્રકારજમ્ ।
ઉપસ્થિતોઽહં બ્રહ્માણં સુતૈઃ સર્વૈઃ સમન્વિતઃ ॥ ૭૭॥

નિશ્ચિતા ભગવન્વિઘ્ના નાટ્યસ્યાસ્ય વિનાશને ।
અસ્ય રક્ષાવિધિં સમ્યગાજ્ઞાપય સુરેશ્વર ॥ ૭૮ ॥

તતશ્ચ વિશ્વકર્માણં બ્રહ્મોવાચ પ્રયત્નતઃ ।
કુરુ લક્ષણસમ્પન્નં નાટ્યવેશ્મ મહામતે ॥ ૭૯ ॥

તતોઽચિરેણ કાલેન વિશ્વકર્મા મહચ્છુભમ્ ।
સર્વલક્ષણસમ્પન્નં કૃત્વા નાટ્યગૃહં તુ સઃ ॥ ૮૦ ॥

પ્રોક્તવાન્દ્રુહિણં ગત્વા સભાયાન્તુ કૃતાઞ્જલીઃ ।
સજ્જં નાટ્યગૃહં દેવ તદ્દેવેક્ષિતુમર્હસિ ॥ ૮૧ ॥

તતઃ સહ મહેન્દ્રેણ સુરૈઃ સર્વૈશ્ચ સેતરૈઃ ।
આગતસ્ત્વરિતો દૃષ્ટું દ્રુહિણો નાટ્યમણ્ડપમ્ ॥ ૮૨ ॥

દૃષ્ટ્વા નાટ્યગૃહં બ્રહ્મા પ્રાહ સર્વાન્સુરાંસ્તતઃ ।
અંશભાગૈર્ભવદ્ભિસ્તુ રક્ષ્યોઽયં નાટ્યમણ્ડપઃ ॥ ૮૩ ॥

રક્ષણે મણ્ડપસ્યાથ વિનિયુક્તસ્તુ ચન્દ્રમાઃ ।
લોકપાલાસ્તથા દિક્ષુ વિદિક્ષ્વપિ ચ મારુતાઃ ॥ ૮૪ ॥

નેપથ્યભૂમૌ મિત્રસ્તુ નિક્ષિપ્તો વરુણોઽમ્બરે ।
વેદિકારક્ષણે વહ્નિર્ભાણ્ડે સર્વદિવૌકસઃ ॥ ૮૫ ॥

વર્ણાશ્ચત્વાર એવાથ સ્તમ્ભેષુ વિનિયોજિતાઃ ।
આદિત્યાશ્ચૈવ રુદ્રાશ્ચ સ્થિતાઃ સ્તમ્ભાન્તરેશ્વથ ॥ ૮૬ ॥

ધારણીશ્વથ ભૂતાનિ  શાલાસ્વપ્સરસ્તથા ।
સર્વવેશ્મસુ યક્ષિણ્યો મહીપૃષ્ઠે મહોદધિઃ ॥ ૮૭ ॥

દ્વારશાલાનિયુક્તૌ  તુ કૃતાન્તઃ કાલ એવ ચ ।
સ્થાપિતૌ દ્વારપત્રેષુ નાગમુખ્યૌ મહાબલૌ ॥ ૮૮ ॥

દેહલ્યાં યમદણ્ડસ્તુ શૂલં તસ્યોપરિ સ્થિતમ્ ।
દ્વારપાલૌ સ્થિતૌ ચૌભૌ  નિયતિર્મૃત્યુરેવ ચ ॥ ૮૯ ॥

પાર્શ્વે ચ રઙ્ગપીઠસ્ય મહેન્દ્રઃ સ્થિતવાન્સ્વયમ્ ।
સ્થાપિતા મત્તવારણ્યાં વિદ્યુદ્દૈત્યનિષૂદની ॥ ૯૦ ॥

સ્તમ્ભેષુ મત્તવારણ્યાઃ સ્થાપિતા  પરિપાલને ।
ભૂતયક્ષપિશાશ્ચ ગુહ્યકાશ્ચ મહાબલાઃ ॥ ૯૧ ॥

જર્જરે તુ વિનિક્ષિપ્તં વજ્રં દૈત્યનિબર્હણમ્ ।
તત્પર્વસુ વિનિક્ષિપ્તાઃ સુરેન્દ્રા હ્યમિતૌજસઃ ॥ ૯૨॥

શિરઃપર્વસ્થિતો બ્રહ્મા દ્વિતીયે શઙ્કરસ્તથા ।
તૃતીયે ચ સ્થિતો વિષ્ણુશ્ચતુર્થે સ્કન્દ એવ ચ ॥ ૯૩॥

પઞ્ચમે ચ મહાનાગાઃ શેષવાસુકિતક્ષકાઃ ।
એવં વિઘ્નવિનાશાય સ્થાપિતા જર્જરે સુરાઃ ॥ ૯૪॥

રઙ્ગપીઠસ્ય મધ્યે તુ સ્વયં બ્રહ્મા પ્રતિષ્ઠિતઃ ।
ઇષ્ટ્યર્થં રઙ્ગમધ્યે તુ ક્રિયતે પુષ્પમોક્ષણમ્ ॥ ૯૫॥

પાતાલવાસિનો યે ચ યક્ષગુહ્યકપન્નગાઃ ।
અધસ્તાદ્રઙ્ગપીઠસ્ય રક્ષણે તે નિયોજિતાઃ ।૯૬॥

નાયકં રક્ષતીન્દ્રસ્તુ નાયિકાં ચ સરસ્વતી ।
વિદૂષકમથૌઙ્કારઃ શેશાસ્તુ પ્રકૃતિર્હરઃ ॥ ૯૭॥

યાન્યેતાનિ નિયુક્તાનિ દૈવતાનીહ રક્ષણે ।
એતાન્યેવાધિદૈવાનિ  ભવિષ્યન્તીત્યુવાચ સઃ ॥ ૯૮॥

એતસ્મિન્નન્તરે દેવૈઃ સર્વૈરુક્તઃ પિતામહઃ ।
સામ્ના તાવદિમે વિઘ્નાઃ સ્થાપ્યન્તાં વચસા ત્વયા ॥ ૯૯॥

પૂર્વં સામં પ્રયોક્તવ્યં દ્વિતીયં દાનમેવ ચ ।
તયોરુપરિ ભેદસ્તુ તતો દણ્ડઃ પ્રયુજ્યતે ॥ ૧૦૦॥

દેવાનાં વચનં શ્રુત્વા બ્રહ્મા વિઘ્નાનુવાચ હ ।
કસ્માદ્ભવન્તો નાટ્યસ્ય વિનાશાય સમુત્થિતાઃ ॥ ૧૦૧॥

બ્રહ્મણો વચનં શ્રુત્વા વિરૂપાક્ષોઽબ્રવીદ્વચઃ ।
દૈત્યૈર્વિઘ્નગણૈઃ સાર્ધં સામપૂર્વમિદં તતઃ ॥ ૧૦૨॥

યોઽયં ભગવતા સૃષ્ટો નાટ્યવેદઃ સુરેચ્છયા ।
પ્રત્યાદેશોઽયમસ્માકં સુરાર્થં ભવતા કૃતઃ ॥ ૧૦૩॥

તન્નૈતદેવં કર્તવ્યં ત્વયા લોકપિતામહ ।
યથા દેવસ્તથા દૈત્યાસ્ત્વત્તઃ સર્વે વિનિર્ગતાઃ ॥ ૧૦૪॥

વિઘ્નાનાં વચનં શ્રુત્વા બ્રહ્મા વચનમબ્રવીત્ ।

અલં વો મન્યુના દૈત્યા વિષાદં ત્યજતાનઘાઃ ॥ ૧૦૫॥

ભવતાં દેવતાનાં ચ શુભાશુભવિકલ્પકઃ ।
કર્મભાવાન્વયાપેક્ષી નાટ્યવેદો મયા કૃતઃ ॥ ૧૦૬॥

નૈકાન્તતોઽત્ર ભવતાં દેવાનાં ચાનુભાવનમ્ ।
ત્રૈલોક્યાસ્યાસ્ય સર્વસ્ય નાટ્યં ભાવાનુકીર્તનમ્ ॥ ૧૦૭॥

ક્વચિદ્ધર્મઃ ક્વચિત્ક્રીડા ક્વચિદર્થઃ ક્વચિચ્છમઃ ।
ક્વચિદ્ધાસ્યં ક્વચિદ્યુદ્ધં ક્વચિત્કામઃ ક્વચિદ્વધઃ ॥ ૧૦૮॥

ધર્મો ધર્મપ્રવૃત્તાનાં કામઃ કામોપસેવિનામ્ ।
નિગ્રહો દુર્વિનીતાનાં વિનીતાનાં દમક્રિયા ॥ ૧૦૯॥

ક્લીબાનાં ધાર્ષ્ટ્યજનનમુત્સાહઃ શૂરમાનિનામ્ ।
અબુધાનાં વિબોધશ્ચ વૈદુષ્યં વિદુષામપિ ॥ ૧૧૦॥ ।

ઈશ્વરાણાં વિલાસશ્ચ સ્થૈર્યં દુઃખાર્દિતસ્ય ચ ।
અર્થોપજીવિનામર્થો ધૃતિરુદ્વેગચેતસામ્ ॥ ૧૧૧॥

નાનાભાવોપસમ્પન્નં નાનાવસ્થાન્તરાત્મકમ્ ।
લોકવૃત્તાનુકરણં નાટ્યમેતન્મયા કૃતમ્ ॥ ૧૧૨॥

ઉત્તમાધમમધ્યાનાં નરાણાં કર્મસંશ્રયમ્ ।
હિતોપદેશજનનં ધૃતિક્રીડાસુખાદિકૃત્ ॥ ૧૧૩॥

(એતદ્રસેષુ ભાવેષુ સર્વકર્મક્રિયાસ્વથ ।
સર્વોપદેશજનનં નાટ્યં લોકે ભવિષ્યતિ ॥ )
દુઃખાર્તાનાં શ્રમાર્તાનાં શોકાર્તાનાં તપસ્વિનામ્ ।
વિશ્રાન્તિજનનં કાલે નાટ્યમેતદ્ભવિષ્યતિ ॥ ૧૧૪॥

ધર્મ્યં યશસ્યમાયુષ્યં હિતં બુદ્ધિવિવર્ધનમ્ ।
લોકોપદેશજનનં નાટ્યમેતદ્ભવિષ્યતિ ॥ ૧૧૫॥

ન તજ્જ્ઞાનં ન તચ્છિલ્પં ન સા વિદ્યા ન સા કલા ।
નાસૌ યોગો ન તત્કર્મ નાટ્યેઽસ્મિન્ યન્ન દૃશ્યતે ॥ ૧૧૬॥

તન્નાત્ર મન્યુઃ કર્તવ્યો ભવદ્ભિરમરાન્પ્રતિ ।
સપ્તદ્વીપાનુકરણં નાટ્યમેતદ્ભવિષ્યતિ ॥ ૧૧૭॥

(યેનાનુકરણં નાટ્યમેતત્તદ્યન્મયા કૃતમ્ ॥)

દેવાનામસુરાણાં ચ રાજ્ઞામથ કુટુમ્બિનામ્ ।
બ્રહ્મર્ષીણાં ચ વિજ્ઞેયં નાટ્યં વૃત્તાન્તદર્શકમ્ ॥ ૧૧૮॥

યોઽયં સ્વભાવો લોકસ્ય સુખદુઃખસમન્વિતઃ ।
સોઽઙ્ગાદ્યભિનયોપેતો નાટ્યમિત્યભિધીયતે ॥ ૧૧૯॥

(વેદવિદ્યેતિહાસાનામાખ્યાનપરિકલ્પનમ્ ।
વિનોદકરણં લોકે નાટ્યમેતદ્ભવિષ્યતિ ॥

શ્રુતિસ્મૃતિસદાચારપરિશેષાર્થકલ્પનમ્ ।
વિનોદજનનં લોકે નાટ્યમેતદ્ભવિષ્યતિ ॥)
એતસ્મિન્નન્તરે દેવાન્ સર્વાનાહ પિતામહઃ ।
ક્રિયતામદ્ય વિધિવદ્યજનં નાટ્યમણ્ડપે ॥ ૧૨૦॥

બલિપ્રદાનૈર્હોમૈશ્ચ મન્ત્રૌષધિસમન્વિતૈઃ ।
ભોજ્યૈર્ભક્ષૈશ્ચ પાનૈશ્ચ બલિઃ સમુપકલ્પતામ્ ॥ ૧૨૧॥

મર્ત્યલોકગતાઃ સર્વે શુભાં પૂજામવાપ્સ્યથ ।
અપૂજયિત્વા રઙ્ગં તુ નૈવ પ્રેક્ષાં પ્રવર્તયેત્ ॥ ૧૨૨॥

અપૂજયિત્વા રઙ્ગં તુ યઃ પ્રેક્ષાં કલ્પયિષ્યતિ ।
નિષ્ફલં તસ્ય તત્ જ્ઞાનં તિર્યગ્યોનિં ચ યાસ્યતિ ॥ ૧૨૩॥

યજ્ઞેન સંમિતં હ્યેતદ્રઙ્ગદૈવતપૂજનમ્ ।
તસ્માત્સર્વપ્રયત્નેન કર્તવ્યં નાટ્યયોક્તૃભિઃ ॥ ૧૨૪॥

નર્તકોઽર્થપતિર્વાપિ યઃ પૂજાં ન કરિષ્યતિ ।
ન કારયિષ્યન્ત્યન્યૈર્વા પ્રાપ્નોત્યપચયં તુ સઃ ॥ ૧૨૫॥

યથાવિધિં યથાદૃષ્ટં યસ્તુ પૂજાં કરિષ્યતિ ।
સ લપ્સ્યતે શુભાનર્થાન્ સ્વર્ગલોકં ચ યાસ્યતિ ॥ ૧૨૬॥

એવમુક્ત્વા તુ ભગવાન્દ્રુહિણઃ સહદેવતૈઃ ।
રઙ્ગપૂજાં કુરુશ્વેતિ મામેવં સમચોદયત્ ॥ ૧૨૭॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે નાટ્યોત્પત્તિર્નામ પ્રથમોઽધ્યાયઃ ।

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 1*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*